# संस्कृत कक्षा – १०

## [श्लोकों की संस्कृत व्याख्या]

1. पश्याम्येकं भासमिति द्रोणं पार्थोऽभ्यभाषत ।

   न तु वृक्षं भवन्तं वा पश्यामीति च भारत ॥

   संस्कृतार्थ - लक्ष्यवेधपरीक्षाकाले अर्जुनः द्रोणाचार्यम् अवोचद् यत् - हे गुरुदेव ! अहं तु न वृक्षम् अवलोकयामि न च श्रीमन्तमेव , अहं तु केवलमेकमात्रं खगमेव विलोकयामि ।

2. ततो युधिष्ठिरः पूर्वं धनुर्गृह्य परन्तपः ।

   तस्थौ भासं समुद्दिश्य गुरुवाक्य प्रणोदितः ॥

   संस्कृतार्थ - गुरोः द्रोणाचार्यस्य पूर्वम् उक्तं ' दुर्धर्षं बाणं सन्धत्स्व मत् वाक्यान्ते तं विमुञ्च ' इति कथनं श्रुत्वा प्रेरयित्वा च शत्रुनाशक : युधिष्ठिरः स्वहस्ते धनुः गृहीत्वा पक्षिणं लक्षयित्वा स्थितः ।

3. भाषासु मुख्या मधुरा , दिव्या गीर्वाणभारती ।

   तस्माद्धि काव्यं मधुरं , तस्मादपि सुभाषितम् ॥

   संस्कृतार्थ - अस्मिन् श्लोके कविः कथयति यत् भारतीय समस्त भाषासु संस्कृत भाषा प्रमुखा भाषां अस्ति । सा अति मधुरा अपि अस्ति दिव्या चास्ति तस्मात् निश्चयेन काव्यम् मधुरम् अस्ति । तस्मादपि सूक्तयः मधुराः सन्ति । संस्कृत भाषायां सूक्तयः अति मधुराः सन्ति इत्यर्थः ।

4. पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम् ।

मूढैः पाषाण - खण्डेषु रत्न - संज्ञा विधीयते ॥

संस्कृतार्थ - कविः कथयति अस्मिन् धरातले त्रीणि रत्नानि सुवचनं , अन्नं च जलं विद्यते । अस्य विपरीतार्थ : मूर्खा : जनाः एव पाषाण - खण्डान् गणयन्ति ।

5. काव्यशास्त्रविनोदेन कालो गच्छति धीमताम् ।

व्यसनेन च मूर्खाणां निद्रया कलहेन वा ॥

संस्कृतार्थ - कविः कथयति यत् ये पुरुषाः बुद्धिमन्तः भवन्ति ते स्व समयं काव्यादि ग्रन्थानां वा सद् - ग्रन्थानाम् अध्यनेन यापयन्ति यावच्च मूर्खाः जनाः स्वसमयम् परस्पर कलहेन , निद्रया अथवा व्यसनै : यापयन्ति ।

6. श्लोकस्तु श्लोकतां याति यत्र तिष्ठन्ति साधवः ।

लकारो लुप्यते तत्र यत्र तिष्ठन्त्यसाधवः ॥

संस्कृतार्थ - अस्मिन् संसारे यत्र सज्जनाः निवसन्ति तत्र श्लोकः कीर्ति जनयति । यत्र दुष्टाः निवसन्ति तत्र श्लोकस्य लकार वर्णस्य लोपात् शोक : इत्येव शब्द : शिष्टः भवति ।

ज्ञानात् मुक्तिः
ज्ञानम् मनुष्यस्य तृतीय नेत्रम्

7. अप्राप्तं कालं वचनं वृहस्पतिरपि ब्रुवन ।

प्राप्नुयाद् बुद्ध्यवज्ञानमपमानश्च शाश्वतम् ।।

संस्कृतार्थ - अस्मिन् श्लोके कविः कथयति यत् नरः सदैव कालोचित वार्तालापं कुर्यात् । चेत् बृहस्पतिः अपि कालोचित न वदति तदा स अपि निरन्तरण बुद्धि अवज्ञानं अपमानवम् च प्राप्तं करोति ।

8. केयूराः न विभूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वलाः ।

न स्नानं न विलेपनं न कुसुमं नालङ्कृता मूर्द्धजाः ।।

संस्कृतार्थ – मनोहराः केयूराः , चन्द्र इव उज्ज्वला : हाराः , स्नानं , चन्दन चर्चितम् विलेपनम् , सुगन्धयुक्तं मनोहरञ्च , कुसुमं केशपाशः च पुरुषं न विभूषयन्ति , यतः इमे वास्तविकं भूषणं न सन्ति । एताम् आकर्षणम् क्षणभंगुरम् भवति ।

9. वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते ।

क्षीयन्ते खलु भूषणानि सततं वाग्भूषणम् भूषणम् ।।

संस्कृतार्थ - अस्मिन् विश्वे एका वाणी , या अध्ययनेन विनयेन च संस्कृता धार्यते , सर्वोत्तमं भूषणं अस्ति । सा पुरुष विभूषयन्ति । अन्यानि भूषणानि हि नष्टाः भवन्ति । वाग्भूषणं वास्तविकं भूषणम् अस्ति । यः कदापि न विनश्यति ।

10.लक्ष्मीन या याचकदुःखहारिणी

विद्या न याऽप्पच्युत - भक्तिकारिणी ।

पुत्रो न यः पण्डितमण्डलाग्रणी :

सा नैव सा नैव सा नैव ।

संस्कृतार्थ - या श्री : याचकानां दुःखं न परिहरति सा श्री : श्री : न भवति , या विद्या अपि भगवतः विष्णो : भक्तिं न जनयति सा विद्या अपि विद्या न भवति , यः च पण्डितानां समुदाये सर्वोपरि न तिष्ठति , सः पुत्रः अपि पुत्रपदभाजनं न ।

11. अभिवादनशीलस्य , नित्यं वृद्धोपसेविनः ।

चत्वारि तस्य वर्धन्ते , आयुर्विद्या यशोबलम् ॥

संस्कृतार्थ - अस्मिन् श्लोके मनुः कथयति यत् यः जनः स्वपूज्यानाम् प्रणमति , वृद्धानाम् सेवां करोति , तस्य जनस्य आयुः , विद्या , यशः , बलम् च इति चत्वारि वस्तूनि वर्धन्ते ।

12.न स्नानमाचरेद् भुक्त्वा , नातुरो न महानिशि ।

न वासोभिः सहाजस्त्रं , नाविज्ञाते जलाशये ॥

संस्कृतार्थ - मानवः भोजनं कृत्वा , रुग्णावस्थायां , महानिशि , वस्त्रैः सह अजस्त्रं अविज्ञाते जलाशये च स्नानं न कुर्यात् । यः इदृशम् आचरति , सः महाविनाशं प्राप्नोति ।

13.आर्द्रपादस्तु भुञ्जीत् , नार्द्रपादस्तु संविशशेत् ।

आर्द्रपादस्तु भुञ्जानो , दीर्घमायुरवाप्नुयात् ॥

संस्कृतार्थ - अस्मिन् श्लोके कविः कथयति यत् नरः पादौ प्रक्षाल्य भोजनं कुर्यात् । आर्द्रपादौ कदापि न संविशेत् , आर्द्रपादः भोजनम् कुर्वन् नरः दीर्घायुः भवति ।

14.सत्यं ब्रूयात्प्रियं ब्रूयान्न ब्रूयात्सत्यमप्रियम् ।

प्रियं च नानृतं ब्रूयादेष धर्मः सनातनः ॥

संस्कृतार्थ - महर्षिः मनुः सत्यभाषणस्य विषये नियमं कथयति यत् मनुष्यः सदा सत्यं वदेत् । तादृशं सत्यं न वदेत् यत् कस्यापि अप्रियं कटु च अस्ति । तादृशं प्रियम् अपि न वदेत् यत् सत्यं न अस्ति । इत्थं प्रकारेण सत्य - प्रिय - भाषणं सर्वेषां समीचीनः धर्मः अस्ति ।

15. सर्वं परवशं दुःखं सर्वमात्मवशं सुखम् ।

एतद्विद्यात् समासेन , लक्षणं सुखदुःखयोः ।।

संस्कृतार्थ - अस्मिन् संसारे यद्यपि पराधीनम् अस्ति तत्सर्वं दुःखस्वरूपम् अस्ति । यत् स्वाधीनम् अस्ति तत्सर्वं सुखस्वरूपम् अस्ति । पराधीनता दुःखस्य स्वाधीनता च सुखस्य संक्षेपेण लक्षणम् जानीयात् - इति व्यासेन महाभारते उक्तम् ।

16.एकाकी चिन्तयेन्नित्यं विविक्ते हितमात्मनः ।

एकाकी चिन्तयानो हि , परं श्रेयोऽधिगच्छति ॥

संस्कृतार्थ - अस्मिन् पद्ये एकान्तचिन्तनस्य महत्त्वं कविना प्रदर्शितम् । प्रत्येक मानव : एकान्तस्थले स्थित्वा प्रतिदिनं स्वहिताय चिन्तनम् कुर्यात्।य : मानवः नित्यप्रति एकाकी भूत्वा स्वहितकारणं विषयं प्रति चिन्तयति सः सर्वथा स्वकल्याणं प्राप्नोति ।

17.कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।

मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि ॥

संस्कृतार्थ - अस्मिन् श्लोके श्रीकृष्ण : अर्जुनं बोधयति – पार्थ ! तव अधिकारः कर्मकरणे एव अस्ति , किं कर्म कुर्यात् इति त्वत् अधीनं वर्तते , किन्तु कस्य कर्मणःकिम् फलं भवेत् अस्मिन् विषये कदापि तव अधिकारः न अस्ति । तस्मात् कदापि फलहेतोः कर्म न कुरु , परमं कर्म अकरणे अपि ते आसक्तिः न भवेत् ।

18.श्रद्धावाँल्लभते ज्ञानं तत्परः संयतेन्द्रियः ।

ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति ॥

संस्कृतार्थ - अस्मिन् श्लोके श्रीकृष्ण : अर्जुनं उपदिशति यत् यः जनः संयतेन्द्रियः श्रद्धावान् च अस्ति स ज्ञानं लभते । ज्ञानं प्राप्त्वा स शीघ्रम् एव परां शान्ति प्राप्य सुखं अनुभवति ।

19.यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति ।

शुभाशुभपरित्यागी भक्तिमान्यः स मे प्रियः ॥

संस्कृतार्थ - अस्मिन् श्लोके श्रीकृष्णः अर्जुनं उपदिशन् कथयति यत् - हे अर्जुन ! यः मनुष्यः स्वाभीष्टं प्राप्य न प्रसीदति , न द्वेषं करोति , न शोचति , न कामनां करोति , शुभाशुभयोः कर्मयोः परित्यजति स भक्तिमान् जनः मम अति प्रियः भवति ।

20. योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय ।

सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते ॥

संस्कृतार्थ- भगवान् श्रीकृष्णः अर्जुनम् उपदिशन् कथयति यत् - भो धनञ्जय ! आसक्ति त्यक्त्वा एकाग्रचित्तं भूत्वा स्वकर्माणि कुरु , तयोः सिसिद्ध्योः समभावं धरस्व । एतद्धि योगः उच्यते ।

21.समः शत्रौ च मित्रे च तथा मानापमानयोः।

शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः ॥

संस्कृतार्थ - अस्मिन् श्लोके श्रीकृष्णः अर्जुनं कथयति यत् यः जनः रिपौ सुहृदि च समानभावेन वर्तते , यः सम्माने अपमाने च समान भावेन आचरति , न सम्माने हृष्यति न च अपमाने खिद्यति । यः शीते ग्रीष्मे , सुखे दुःखे च समानं व्यवहरति , यस्य कस्मिन् अपि विषये आसक्ति : नास्ति स एव जनः मे प्रियः भवति ।


ज्ञानसिंधु कोचिंग क्लासेज

द्वारा – अरुणेश सर

चैनल लिंक – https://www.youtube.com/channel/UCBEWNQ637WdCBl6S4KCIzZQ

वेबसाइट लिंक - https://gyansindhuclasses.com/

फेसबुक पेज लिंक - https://www.facebook.com/Gyansindhu-Coaching-Classess-172631304514334/